योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः १४१

एकचत्वारिंशदधिकशततमः सर्गः १४१

मुनिरुवाच ।

तत्र दंदह्यमानोऽपि नाभवं दुःखभागहम् ।

स्वप्ने स्वप्नोऽयमित्येष जानन्नग्नावपि च्युतः ।। १

ज्वालाजालनवोड्डीतिमण्डलैरखिलैर्नभः ।

अलातचक्रवच्चारु केवलं भ्रान्तवानहम् ।। २

तं दवाग्निमहं यावत्तत्त्ववित्त्यादखिन्नधीः ।

विचारयाम्यखिन्नात्मा मारुतस्तावदाययौ ।। ३

सीत्कारमतिगम्भीरं दधन्मेघरवोपमम् ।

जगत्पदार्थैरावृत्तैरुह्यमानैः परावृतः ।। ४

बृहद्भिर्घुंघुमावेगैर्वने द्विगुणिताम्बुदः ।

सूर्यैरावृत्तिभिर्व्यूढैर्विमिश्रालातचक्रकः ।। ५

ज्वालासंध्याभ्रनिवहैर्वृहदग्निनदीशतः ।

शैलद्विगुणभूखण्डदानवामरपत्तनः ।। ६

भूतैर्द्विगुणपात्रौघो भ्रान्तैरम्बरकुक्षिषु ।

दग्धादग्धाभिरप्यर्धदग्धाभिरितरेतरम् ।। ७

पतन्तीभिः सुरस्त्रीभिर्द्विगुणाग्निशिखालवः ।

पतदङ्गारधारौघकणसीकरदन्तुरः ।। ८

अलातविद्युतो धुन्वन्पूताङ्गारोग्रमण्डलीः ।

धूमान्धकारैः स्थगयन्म्लानमूर्ध्वदिशोमुखम् ।। ९

भूमेर्व्योम्नो दिङ्मुखेभ्यः समन्ता-

ज्ज्वालासंध्यावारिदा निर्गतास्ते ।

यैस्तैर्ज्वालाशैलसंपिण्डमात्रं

सव्योमौकाः संस्थिता सप्तलोकी ।। १०

क्वापि प्रोत्फालकीर्णानलकणकपिलप्रोल्लसन्मूर्ध-

जालिः

क्वापि प्रोड्डीनकुड्यः कटुरटनपटुर्भस्मसंपिण्डपाण्डुः ।

क्वापि ज्वालापटालीं परिदधदभितः संपतन्तीं

गृहीतां

रौद्रः कर्तुं प्रवृत्तो हर इव स तदा मारुतो

नृत्यलीलाः ।। ११ ।।

इत्यार्षे श्रीवासि० वाल्मी० दे० मो० नि० उ० अ० वि० श० कल्पान्तवर्णनं नामैकचत्वारिशदधिकशततमः सर्गः ।।

१४१ ।।